# kumArI pUjA

# કુમારી પૂજા

## Document Information

Text title : kumArI pUjA

File name : kumArIpUjA.itx

Category : devii, pUjA, durgA

Location : doc_devii

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay gopal.j.upadhyay at gmail.com, Pulakit Vyasa Shastri

Description/comments : Kumari pujan shloka/verses from various sources

Latest update : October 4, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose. Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

**Please help to maintain respect for volunteer spirit.**

October 4, 2019

*sanskritdocuments.org*

# કુમારી પૂજા

॥ માહાત્મ્ય ॥

બ્રાહ્મણી સર્વકાર્યેષુ જયાર્થે નૃપવંશજામ્ ।
લાભાર્થે વૈશ્યવંશોત્થાં સુતાર્થે શૂદ્રવંશજામ્ ॥

દારુણે ચાન્ત્યજાતીનાં પૂજયેદ્વિધિના નરઃ ।
વર્જયેત્ સર્વકાર્યેષુ દાસીગર્ભસમુદ્ભવામ્ ॥

॥ રુદ્રયામલે ॥

નટીકન્યાં હીનકન્યાં તથા કાપાલિકન્યકામ્ ।
રજકસ્યાપિ કન્યા ચ તથા નાપિતકન્યકામ્ ॥

ગોપાલકન્યકાં ચૈવ બ્રાહ્મણસ્યાપિ કન્યકામ્ ।
શૂદ્રકન્યાં વૈદ્યકન્યાં તથા વૈશ્યસ્ય કન્યકામ્ ॥

ચાણ્ડાલકન્યકાં વાપિ યત્રકુત્રાશ્રમે સ્થિતામ્ ।
સુહૃદવર્ગસ્ય કન્યાં ચ સમાનીય પ્રયત્નતઃ ॥

॥ યોગિનીતન્ત્રે ॥

યદિ ભાગ્યવશાદ્દેવિ વેશ્યાકુલસમુદ્ભવા ।
કુમારી લભ્યતે કાન્તે સર્વસ્વેનાપિ સાધકઃ ॥

યત્નતઃપૂજયેતાં તુ સ્વર્ણરૌપ્યાદિભિર્મુદા ।
તદા તસ્ય મહાસિદ્ધિર્જાયતે નાત્ર સંશયઃ ॥

તસ્માત્તાં પૂજયેદ્બાલાં સર્વજાતિ સમુદ્ભવામ્ ।
જાતિભેદોનકર્ત્તવ્યઃકુમારીપૂજને-શિવે ॥

જાતિભેદાન્મહેશાનિ નરકાન્ન નિવર્ત્તતે ।
વિચિકિત્સાપરો મન્ત્રી ધ્રુવં સ પાતકી ભવેત્ ॥

એષા પ્રશસ્તા કુમારી તુ સર્વજાતીયેવ પૂજ્યા ।
॥ કુબ્જિકાતન્ત્રે ॥

પઞ્ચવર્ષાત્સમારભ્ય યાવદ્ દ્વાદશવાર્ષિકી ।
કુમારી સા ભવેદ્દેવી નિજરૂપપ્રકાશિની ॥

ષડ્વર્ષાચ્ચ સમારભ્ય યાવચ્ચ  નવવર્ષિકા ।
તાવચ્ચૈવ મહેશાનિ સાધકાભીષ્ટસિદ્ધયે ॥

અષ્ટવર્ષાત્સમારભ્ય યાવત્ત્રયોદશાબ્દિકી ।
કુલજાં તાં વિજાનિયાત્ તત્ર પૂજાં સમાચરેત્ ॥

દશવર્ષાત્સમારભ્ય  યાવત્ષોડશવાર્ષિકી ।
યુવતીં તાં વિજાનિયાદ્ દેવતાં તાં વિચિન્તયેત્ ॥

॥ વિશ્વસારતન્ત્રે ॥

અષ્ટવર્ષા તુ સા કન્યા ભવેદ્ગૌરી વરાનને ।
નવવર્ષા રોહિણી સા દશવર્ષા તુ કન્યકા ॥

અત ઊર્ધ્વં મહામાયા ભવેત્સૈવ રજસ્વલા ॥

॥ રુદ્રયામલે ॥

એકવર્ષા ભવેત્ સન્ધ્યા દ્વિવર્ષા ચ સરસ્વતી ।
ત્રિવર્ષા ચ ત્રિધામૂર્તિશ્ચતુર્વર્ષા તુ કાલિકા ॥

શુભગા પઞ્ચવર્ષા તુ ષડ્વર્ષા ચ હ્યુમા ભવેત્ ।
સપ્તભિર્માલિની પ્રોક્તા હ્યષ્ટવર્ષા ચ કુબ્જિકા ॥

નવભિઃ કાલસન્દર્ભા દશભિશ્ચાપરાજિતા ।
એકાદશા તુ રુદ્રાણી દ્વાદશાબ્દા તુ ભૈરવી ॥

ત્રયોદશા મહાલક્ષ્મી દ્વિસપ્તા પીઠનાયિકા ।
ક્ષેત્રજ્ઞા પઞ્ચદશભિઃ ષોડશે ચામ્બિકા ભવેત્ ।
એવં ક્રમેણ સમ્પૂજ્ય યાવત્પુષ્પં ન જાયતે ॥ (પુષ્પં રજોસ્રાવમ્)
પ્રતિપદાદિ પૂર્ણાન્ત વૃદ્ધિભેદેન પૂજયેત્ ।
મહાપર્વસુ સર્વેષુ વિશેષાચ્ચ પવિત્રકે ॥

મહાનવમ્યાં દેવેશિ કુમારીશ્ચ પ્રપૂજયેત્ ।
અષ્ટોત્તરશતં વાપિ એકાં વાપિ પ્રપૂજયેત્ ॥

પૂજિતા પ્રતિપૂજ્યન્તે નિર્દહન્ત્યવમાનિતાઃ ।
કુમારી યોગિની સાક્ષાત્ કુમારી પરદેવતા ॥

અસુરા અષ્ટનાગાશ્ચ યે યે દુષ્ટગ્રહા અપિ ।
ભૂતવૈતાલગન્ધર્વ ડાકિનીયક્ષરાક્ષસાઃ ॥

યાશ્ચાન્યા દેવતાઃ સર્વા ભૂર્ભુવઃસ્વશ્ચ ભૈરવાઃ ।
પૃથિવ્યાદીનિ સર્વાણિ બ્રહ્માણ્ડં સચરાચરમ્ ॥

બ્રહ્મા વિષ્ણુશ્ચ રુદ્રશ્ચ ઈશ્વરશ્ચ સદાશિવઃ ।
સન્તુષ્ટઃ સર્વતુષ્ટશ્ચ યસ્તુ કન્યાં પ્રપૂજયેત્ ॥

॥ મન્ત્રમહોદધૌ ॥

દ્વિવર્ષા સા કુમાર્યુક્તા ત્રિમૂર્તિઃ હાયનત્રિકા ।
ચતુરદ્બા તુ કલ્યાણી પઞ્ચવર્ષા તુ રોહિણી ॥

ષડબ્દા કાલિકા પ્રોક્તા ચણ્ડિકા સમહાયના ।
અષ્ટવર્ષા શામ્ભવી સ્યાત્ દુર્ગા તુ નવહાયના ।
સુભદ્રા દશવર્ષોક્તા નામમન્ત્રૈઃ પ્રપૂજયેત્ ॥

પૂજાદિના પૂર્વદિને - (પૂજા સે એક દિન પુર્વ હી નિમન્ત્રણ દેના હૈ ।)
ગન્ધપુષ્પાક્ષતાદિભિર્મૂલેન
॥ ભગવતિ કુમારિ પૂજાર્થં ત્વં મયા નિમન્ત્રિતાસિ માં કૃતાર્થય ॥

ઇતિ નિમન્ત્ર્ય નમસ્કુર્યાત્ ॥

નિમન્ત્રિતાં પ્રાતરાહૂય પ્રદક્ષિણીકૃત્ય -
પત્નીદ્વારા ઉદ્વર્તનાદ્યૈઃ સ્નાપયિત્વા ।
ગન્ધતૈલેન શરીરં સંસ્કાર્ય । કેશં પરિષ્કૃત્ય ।
લલાટે સિન્દૂરં - નયનયોઃ કજ્જલં સર્વાઙ્ગે ચન્દનં
વસ્ત્રાલઙ્કારૈરાભૂષ્ય । સપત્નીકયજમાનઃ -
કુમારીં પૂજાગૃહે આનીય પાદૌ પ્રક્ષાલ્ય ।
અષ્ટદલપીઠોપરિ સમાવેશ્ય । તામ્બૂલેન મુખં સંશોધ્ય ।
॥ સઙ્કલ્પઃ ॥

દેશકાલૌ સઙ્કીર્તનાન્તે -કામના સિદ્ધ્યર્થં -કર્મણિ નવરાત્રૌ વા
-દેવતા પ્રીત્યર્થં કુમારીપૂજાં કરિષ્યે

અથવા બટુક કુમારી સુવાસિની પૂજાં કરિષ્યે ॥

(૫ સે ૧૨વર્ષ કા ઉપનીત બ્રાહ્મણબટુ)
(કૈશોરી યુવતી યતિઃ । અપ્રૌઢા ચૈવ પ્રૌઢા ચ વૃધ્દ્મમાતા બલપ્રદા ।)
(દુર્ગાશતનામસ્તોત્રે૧૨-૧૩)

॥ બટુક પૂજન ॥

ઉપનીત કેશાન્તપૂર્વસંજ્ઞક બ્રાહ્મણબટું નિમન્ત્ર્ય ।
સ્નાનાદિભિઃ સંસ્કાર્ય - "બં બટુકાય નમઃ" ઇતિ સોપવીત ગન્ધાક્ષત-
વસ્ત્રયુગ્મ-કુણ્ડલાદિભિરભ્યર્ચ્ય - નમસ્કુર્યાત્ ॥

કરકલિતકપાલઃ કુણ્ડલીદણ્ડપાણિસ્તરુણતિમિરનીલો વ્યાલયજ્ઞોપવીતી ।
ક્રતુસમયસપર્યાવિઘ્નવિચ્છેદહેતુર્જયતિ બટુકનાથઃ સિદ્ધિદઃ સાધકાનામ્ ॥

સુપ્રસન્નબટુકાય દ્વિજવર્યાય મેધસે ।
ભૈરવાય નમસ્તુભ્યમનુજ્ઞાં દાતુમર્હસિ ॥

॥ ષડઙ્ગન્યાસઃ ॥

ક્લાં કુમારિકે હૃદયાય નમઃ । ક્લીં કુમારિકે શિરસે સ્વાહા ।
ક્લું કુમારિકે શિખાયૈ વષટ્ । ક્લૈં કુમારિકે કવચાય હુમ્ ।
ક્લૌં કુમારિકે નેત્રત્રયાય વૌષટ્ । ક્લઃ કુમારિકે અસ્ત્રાય ફટ્ ॥

॥ અથ કરન્યાસઃ ॥

ક્લાં કુમારિકે અઙ્ગુષ્ઠાભ્યાં નમઃ । ક્લીં કુમારિકે તર્જનીભ્યાં નમઃ ।
ક્લું કુમારિકે મધ્યમાભ્યાં નમઃ । ક્લૈં કુમારિકે અનામિકાભ્યાં નમઃ ।
ક્લૌં કુમારિકે કનિષ્ઠિકાભ્યાં નમઃ । ક્લઃ કુમારિકે
કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

॥ કુમારિકાધ્યાનમ્ ॥

શઙ્ખકુન્દેન્દુ ધવલાં દ્વિભુજાં વરદાભયામ્ ।
ચન્દ્રમયમહામ્ભોજભાવહાવ વિરાજિતામ્ ॥

બાલરૂપાં ચ ત્રૈલોક્ય સુન્દરીં વરવર્ણિનીમ્ ।
નાનાલઙ્કારનમ્રાઙ્ગીં ભદ્રવિદ્યાં પ્રકાશિનીમ્ ॥

ચારુહાસ્યાં મહાનન્દહૃદયાં શુભદાં શુભામ્ ॥

ઇતિ ધ્યાત્વા શિરસિ પુષ્પં દત્વાવાહયેત્ —

(જપનીય, અનુષ્ઠાનીય મન્ત્રો કે પ્રત્યેક અક્ષરો દેવીમય હૈં)
મન્ત્રાક્ષરમયીં લક્ષ્મીં માતૃણાં રૂપધારિણીમ્ ।
નવદુર્ગાત્મિકાં સાક્ષાત્ કન્યામાવાહયામ્યહમ્ ॥

ઇતિ પુષ્પૈરાવાહ્ય ॥

હ્રીં કુલકુમારિકાયૈ નમઃ - ઇદં વઃ પાદ્યં પાદાવનેજનં પાદપ્રક્ષાલનમ્
(પાદ્યમન્ત્રમુચ્ચાર્ય, પાદ્યં સમર્પયામિ ॥

હ્રીં કુલકુમારિકાયૈ નમઃ - ઇદમર્ઘ્યં સ્વાહા
(અર્ઘ્યમન્ત્રમુચ્ચાર્ય, અર્ઘ્યં કલ્પયામિ સ્વાહા ॥

હ્રીં કુલકુમારિકાયૈ નમઃ - ગૃહાણેદમાચમનીયં વં નમઃ
(વં -આચમનીયમન્ત્રમુચ્ચાર્ય, આચમનં કલ્પયામિ ॥

હ્રીં કુલકુમારિકાયૈ નમઃ - ઇદમનુલેપનં નમઃ
(રક્તચન્દનેન કુઙ્કુમેન વા- ગન્ધમન્ત્રમુચ્ચાર્ય,
કનિષ્ઠિકાઙ્ગુષ્ઠયોગેન ગન્ધં પરિકલ્પયામિ નમઃ ॥

હ્રીં કુલકુમારિકાયૈ નમઃ - એતેક્ષતાઃ નમઃ
(અક્ષતદાનમન્ત્રમુચ્ચાર્ય સર્વાઙ્ગુલિભિઃ
અક્ષતાં પરિકલ્પયામિ નમઃ ॥

હ્રીં કુલકુમારિકાયૈ નમઃ - એતાનિ પુષ્પાણિ સમાલ્યાનિ સ બિલ્વપત્રાણિ વૌષટ્
(મન્ત્રમુચ્ચાર્ય, તર્જન્યઙ્ગુષ્ઠયોગેન,
પુષ્પાણિ- સમાલ્યાનિ-બિલ્વપત્રાણિ પરિકલ્પયામિ વૌષટ્ ॥

હ્રીં કુલકુમારિકાયૈ નમઃ - એષ ધૂપઃ
(નાભૌ ધૂપં દત્વા, વામભાગે ધૂપપાત્રં સંસ્થાપ્ય,
ધૂપમન્ત્રમુચ્ચાર્ય, ધૂપં પરિકલ્પયામિ, ઉત્તાનહસ્તસ્થ
તર્જન્યઙ્ગુષ્ઠયોગેન ધૂપમુદ્રાં પ્રદર્શયેત્ ॥

હ્રીં કુલકુમારિકાયૈ નમઃ - એષ દીપઃ
(લલાટાદિ પાદાન્તં દીપં પ્રદર્શ્ય, દેવ્યાદક્ષિણે દીપપાત્રં
નિધાય, દીપમન્ત્રમુચ્ચાર્ય દીપં દર્શયામિ, ઉત્તાનહસ્તસ્થ
મધ્યમાઙ્ગુષ્ઠયોગેન દીપમુદ્રાં પ્રદર્શયેત્ ॥

સુવાસિની પૂજા (૧૧ સે ૧૬વર્ષ તક કી)—
યુગ્મવસ્ત્રાભૂષણાદિભિઃ સન્તોષ્ય -

યા દેવી સર્વભૂતેષુ શક્તિરૂપેણ ૦૦ ઇતિ મન્ત્રેણ વા પાદ્યાદિભિઃ
“હ્રીં સુવાસિન્યૈ નમઃ” ઇતિ દીપદાનાન્તં સમ્પૂજ્ય ॥

હ્રીં સુવાસિન્યૈ નમઃ - ઇદં વઃ પાદ્યં પાદાવનેજનં પાદપ્રક્ષાલનમ્
(પાદ્યમન્ત્રમુચ્ચાર્ય, પાદ્યં સમર્પયામિ ॥

હ્રીં સુવાસિન્યૈ નમઃ - ઇદમર્ઘ્યં સ્વાહા
(અર્ઘ્યમન્ત્રમુચ્ચાર્ય, અર્ઘ્યં કલ્પયામિ સ્વાહા ॥

હ્રીં સુવાસિન્યૈ નમઃ - ગૃહાણેદમાચમનીયં વં નમઃ
(વં -આચમનીયમન્ત્રમુચ્ચાર્ય, આચમનં કલ્પયામિ ॥

હ્રીં સુવાસિન્યૈ નમઃ - ઇદમનુલેપનં નમઃ (રક્તચન્દનેન કુઙ્કુમેન વા-
ગન્ધમન્ત્રમુચ્ચાર્ય, કનિષ્ઠિકાઙ્ગુષ્ઠયોગેન ગન્ધં
પરિકલ્પયામિ નમઃ ॥

હ્રીં સુવાસિન્યૈ નમઃ - એતેક્ષતાઃ નમઃ (અક્ષતદાનમન્ત્રમુચ્ચાર્ય
સર્વાઙ્ગુલિભિઃ, અક્ષતાં પરિકલ્પયામિ નમઃ ॥

હ્રીં સુવાસિન્યૈ નમઃ - એતાનિ પુષ્પાણિ સમાલ્યાનિ સ બિલ્વપત્રાણિ વૌષટ્
(મન્ત્રમુચ્ચાર્ય, તર્જન્યઙ્ગુષ્ઠયોગેન, પુષ્પાણિ- સમાલ્યાનિ-
બિલ્વપત્રાણિ પરિકલ્પયામિ વૌષટ્ ॥

હ્રીં સુવાસિન્યૈ નમઃ - એષ ધૂપઃ (નાભૌ ધૂપં દત્વા, વામભાગે
ધૂપપાત્રં સંસ્થાપ્ય, ધૂપમન્ત્રમુચ્ચાર્ય, ધૂપં પરિકલ્પયામિ,
ઉત્તાનહસ્તસ્થ તર્જન્યઙ્ગુષ્ઠયોગેન ધૂપમુદ્રાં પ્રદર્શયેત્ ॥

હ્રીં સુવાસિન્યૈ નમઃ - એષ દીપઃ (લલાટાદિ પાદાન્તં દીપં પ્રદર્શ્ય,
દેવ્યાદક્ષિણે દીપપાત્રં નિધાય, દીપમન્ત્રમુચ્ચાર્ય દીપં
દર્શયામિ, ઉત્તાનહસ્તસ્થ મધ્યમાઙ્ગુષ્ઠયોગેન દીપમુદ્રાં
પ્રદર્શયેત્ ॥

બટુકકુમારીસુવાસિનીભ્યઃ - પાલાશાદીવિહિત પાત્રે ષડ્રસ નૈવેદ્યં દત્વા,
હ્રી બટુકાય નમઃ - ઇદં નૈવેદ્યં સ્વાહા ।
હ્રીં કુલકુમારિકાયૈ નમઃ - ઇદં નૈવેદ્યં સ્વાહા ।
હ્રીં સુવાસિન્યૈ નમઃ ઇદં નૈવેદ્યં સ્વાહા ।
(નૈવેદ્યમન્ત્રાન્ પઠિત્વા નૈવેદ્યં સમર્પયામીતિ તત્તત્સ્થાને સઙ્કલ્પ્ય,
ઉત્તાનહસ્તસ્થ અનામિકાંઙ્ગુષ્ઠયોગેન નૈવેદ્યમુદ્રાં પ્રદર્શયેત્ ॥)

બટુકાય ફલમ્ -
ફલેન ફલિતં સર્વં ત્રૈલોક્યં સચરાચરમ્ ।
ફલસ્યાર્ઘપ્રદાનેન સફલાઃ સન્તુ મનોરથાઃ ॥

હ્રીં બં બટુકાય નમઃ ઇદં ફલં યથાદત્તં બટુકભૈરવાય ન મમ ॥

કુમારીભ્યઃ તામ્બૂલમ્ -
હ્રીં કુલકુમારિકાયૈ નમઃ । ઇદં તામ્બૂલં યથાદત્તં કુલકુમારીભ્યો ન મમ ॥

સુવાસિનીભ્યશ્ચ –
હ્રીં સુવાસિન્યૈ નમઃ । ઇદં તામ્બૂલં યથાદત્તં સુવાસિન્યૈ
(સુવાસિનીભ્યો) ન મમ ॥

ભૂમૌ પાલાશપત્રે તામ્બૂલપત્રે વા કુઙ્કુમેન ષટ્કોણં વિલિખ્ય ॥

(પુષ્પાઞ્જલિઃ) -
સચ્ચિન્મય પરે દેવિ પરામૃત ચરુપ્રિયે ।
અનુજ્ઞાં દેહિ હે માતર્પરિવારાર્ચનાય તે ॥

અથ ષટ્કોણે - ગન્ધાક્ષતૈઃ ।
આગ્નેયકોણે -ક્લાં કુમારિકે હૃદયાય નમઃ ।
નૈરૃત્યકોણે - ક્લીં કુમારિકે શિરસે સ્વાહા ।
વાયવ્યકોણે - ક્લું કુમારિકે શિખાયૈ વષટ્ ।
ઈશાનકોણે - ક્લૈં કુમારિકે કવચાય હુમ્ ।
પશ્ચિકોણે - ક્લૌં કુમારિકે નેત્રત્રયાય વૌષટ્ ।
પૂર્વકોણે - ક્લઃ કુમારિકે અસ્ત્રાય ફટ્ ॥

મધ્યે - હ્રીં હંસઃ કુલકુમારિકે શ્રી પાદુકાં પૂજયામિ ॥

ઇતિ પુષ્પાઞ્જલિત્રયં દત્ત્વા નવનામભિઃ પૂજયેત્ –

હ્રીં કુમાર્ય્યૈ નમઃ । હ્રીં ત્રિપુરાયૈ નમઃ । હ્રીં કલ્યાણ્યૈ નમઃ ।
હ્રીં રોહિણ્યૈ નમઃ । હ્રીં કામિન્યૈ નમઃ । હ્રીં ચણ્ડિકાયૈ નમઃ ।
હ્રીં શાઙ્કર્યૈ નમઃ । હ્રીં દુર્ગાયૈ નમઃ । હ્રીં સુભદ્રાયૈ નમઃ ॥

ઇતિ સમ્પૂજ્ય તદઙ્ગે “હ્રીં ધનુર્બાણધરાયૈ દુર્ગાયૈ વિઞ્યે નમઃ ।”
ઇતિ દુર્ગાં આવાહ્ય -ષોડશનામભિઃ નમોન્તેન ચ પૂજયેત્ ॥

ઉમાયૈ નમઃ । શૂલધારિણ્યૈ નમઃ । ખેચર્યૈ નમઃ ।

ચત્વરવાસિન્યૈ નમઃ । સુગન્ધનાસિકાયૈ નમઃ ।
સર્વધારિણ્યૈ નમઃ । ચણ્ડિકાયૈ નમઃ । સૌભદ્રિકાયૈ નમઃ ।
અશોકવાસિન્યૈ નમઃ । વજ્રધારિણ્યૈ નમઃ । લલિતાયૈ નમઃ ।
સિંહવાહિન્યૈ નમઃ । ભગવત્યૈ નમઃ । વિન્ધ્યવાસિન્યૈ નમઃ ।
મહાબલાયૈ નમઃ । ભૂતવાસિન્યૈ નમઃ ।

ઇતિ સમ્પૂજ્ય “મૂલમન્ત્રેણ” પુષ્પાઞ્જલિત્રયં દત્વા, પ્રદક્ષિણી કૃત્ય ॥

॥ ત્રિકોણાકારં પ્રણમેત્ ॥

દક્ષિણાદ્વાયવીં ગત્વા દિશં તસ્માચ્ચ શામ્ભવિ ।
તતશ્ચ દક્ષિણાં ગત્વા નમસ્કારસ્ત્રિકોણવત્ ॥

(અર્થાત્ દક્ષિણદિશા સે કદમ કે સહારે ચલતે ચલતે વાયવ્ય મેં
જાકર વહાઁ સે પશ્ચિમ કે સિધે માર્ગ સે હોતે હુએ નૈરૃત્ય કી ઓર
સે પુનઃ દક્ષિણ મેં જાકર વહાઁ સે હી નમસ્કાર કરે ॥)

જગત્પૂજ્યે જગદ્વન્દ્યે સર્વશક્તિસ્વરૂપિણી ।
પૂજાં ગૃહાણ કૌમારિ જગન્માતર્નમોઽસ્તુ તે ॥

ત્રિપુરાં ત્રિગુણાં ધાત્રીં જ્ઞાનમાર્ગસ્વરૂપિણીમ્ ।
ત્રૈલોક્યવન્દિતાં દેવીં ત્રિમૂર્તિં પૂજયામ્યહમ્ ॥

કાલાત્મિકાં કાલભીતાં કારુણ્યથૃદયાં શિવામ્ ।
કારુણ્યજનનીં નિત્યાં કલ્યાણીં પૂજયામ્યહમ્ ॥

અણિમાદિગુણોપેતા મકારાદિસ્વરાત્મિકામ્ ।
શક્તિભેદાત્મિકાં લક્ષ્મીં રોહિણીં પૂજયામ્યહમ્ ॥

કલાધરાં કલારૂપાં કાલચણ્ડસ્વરૂપિણીમ્ ।
કામદાં કરુણાધારાં કામિનીં પૂજયામ્યહમ્ ॥

ચણ્ડધારાં ચણ્ડમાયાં ચણ્ડમુણ્ડવિનાશિનીમ્ ।
પ્રણમામિ ચ દેવેશીં ચણ્ડિકાં પૂજયામ્યહમ્ ॥

સુખનન્દકરીં શાન્તાં સર્વદેવનમસ્કૃતામ્ ।
સર્વભૂતાત્મિકાં દેવીં શાઙ્કરીં પૂજયામ્યહમ્ ॥

દુર્ગમે દુસ્તરે ચૈવ દુઃખત્રયવિનાશિનીમ્ ।
પૂજયામિ સદા ભક્ત્યા દુર્ગાં દુર્ગે નમામ્યહમ્ ॥

સુન્દરીં સ્વર્ણવર્ણાભાં સુખસૌભાગ્યદાયિનીમ્ ।
સુભદ્રજનનીં દેવીં સુભદ્રાં પ્રણમામ્યહમ્ ॥

॥ ઇતિ સંપ્રાર્થ્ય તત્રાઙ્ગે સ્વેષ્ટદેવતાં
(અનુષ્ઠનીય મન્ત્રદેવતાં) ધ્યાત્વા ॥

॥ દુર્ગા અષ્ટોત્તરશતનામસ્તોત્રેણ ચ સ્તુત્વા ॥ (વિશ્વસારતન્ત્રે)
ઈશ્વર ઉવાચ ।
શતનામ પ્રવક્ષ્યામિ શ‍ૃણુષ્વ કમલાનને ।
યસ્ય પ્રસાદમાત્રેણ દુર્ગા પ્રીતા ભવેત્ સતી ॥

સતી સાધ્વી ભવપ્રીતા ભવાની ભવમોચની ।
આર્યા દુર્ગા જયા ચાદ્યા ત્રિનેત્રા શૂલધારિણી ॥

પિનાકધારિણી ચિત્રા ચણ્ડઘણ્ટા મહાતપાઃ ।
મનો બુદ્ધિરહઙ્કારા ચિત્તરૂપા ચિતા ચિતિઃ ॥

સર્વમન્ત્રમયી સત્તા સત્યાનન્દસ્વરૂપિણી ।
અનન્તા ભાવિની ભાવ્યા ભવ્યાભવ્યા સદાગતિઃ ॥

શામ્ભવી દેવમાતા ચ ચિન્તા રત્નપ્રિયા સદા ।
સર્વવિદ્યા દક્ષકન્યા દક્ષયજ્ઞવિનાશિની ॥

અપર્ણાનેકવર્ણા ચ પાટલા પાટલાવતી ।
પટ્ટામ્બર પરીધાના કલમઞ્જીરરઞ્જિની ॥

અમેયવિક્રમા ક્રુરા સુન્દરી સુરસુન્દરી ।
વનદુર્ગા ચ માતઙ્ગી મતઙ્ગમુનિપૂજિતા ॥

બ્રાહ્મી માહેશ્વરી ચૈન્દ્રી કૌમારી વૈષ્ણવી તથા ।
ચામુણ્ડા ચૈવ વારાહી લક્ષ્મીશ્ચ પુરુષાકૃતિઃ ॥

વિમલોત્કર્ષિણી જ્ઞાના ક્રિયા નિત્યા ચ બુદ્ધિદા ।
બહુલા બહુલપ્રેમા સર્વવાહન વાહના ॥

નિશુમ્ભશુમ્ભહનની મહિષાસુરમર્દિની ।
મધુકૈટભહન્ત્રી ચ ચણ્ડમુણ્ડવિનાશિની ॥

સર્વાસુરવિનાશા ચ સર્વદાનવઘાતિની ।
સર્વશાસ્ત્રમયી સત્યા સર્વાસ્ત્રધારિણી તથા ॥

અનેકશસ્ત્રહસ્તા ચ અનેકાસ્ત્રસ્ય ધારિણી ।
કુમારી ચૈકકન્યા ચ કૈશોરી યુવતી યતિઃ ॥

અપ્રૌઢા ચૈવ પ્રૌઢા ચ વૃદ્ધમાતા બલપ્રદા ।
મહોદરી મુક્તકેશી ઘોરરૂપા મહાબલા ॥

અગ્નિજ્વાલા રૌદ્રમુખી કાલરાત્રિસ્તપસ્વિની ।
નારાયણી ભદ્રકાલી વિષ્ણુમાયા જલોદરી ॥

શિવદૂતી કરાલી ચ અનન્તા પરમેશ્વરી ।
કાત્યાયની ચ સાવિત્રી પ્રત્યક્ષા બ્રહ્મવાદિની ॥

ય ઇદં પ્રપઠેન્નિત્યં દુર્ગાનામશતાષ્ટકમ્ ।
નાસાધ્યં વિદ્યતે દેવિ ત્રિષુ લોકેષુ પાર્વતિ ॥

ધનં ધાન્યં સુતં જાયાં હયં હસ્તિનમેવ ચ ।
ચતુર્વર્ગં તથા ચાન્તે લભેન્મુક્તિં ચ શાશ્વતીમ્ ॥

કુમારીં પૂજયિત્વા તુ ધ્યાત્વા દેવીં સુરેશ્વરીમ્ ।
પૂજયેત્ પરયા ભક્ત્યા પઠેન્નામશતાષ્ટકમ્ ॥

તસ્ય સિદ્ધિર્ભવેદ્ દેવિ સર્વૈઃ સુરવરૈરપિ ।
રાજાનો દાસતાં યાન્તિ રાજ્યશ્રિયમવાપ્નુયાત્ ॥

ગોરોચનાલક્તકકુઙ્કુમેવ સિન્ધૂરકર્પૂરમધુત્રયેણ ।
વિલિખ્ય યન્ત્રં વિધિના વિધિજ્ઞો ભવેત્ સદા ધારયતે પુરારિઃ ॥

ભૌમાવાસ્યાનિશામગ્રે ચન્દ્રે શતભિષાં ગતે ।
વિલિખ્ય પ્રપઠેત્ સ્તોત્રં સ ભવેત્ સમ્પદાં પદમ્ ॥

ષોડશનામભિઃ નમોન્તેન ચ  પૂજયેત્  ॥

ઐં સન્ધ્યાયૈ નમઃ । ઐં સરસ્વત્યૈ નમઃ । ઐં ત્રિમૂર્ત્યૈ નમઃ ।
ઐં કાલિકાયૈ નમઃ । ઐં સુભગાયૈ નમઃ । ઐં ઉમાયૈ નમઃ ।
ઐં માલિન્યૈ નમઃ । ઐં કુબ્જિકાયૈ નમઃ । ઐં કાલસઙ્કર્ષિણ્યૈ નમઃ ।
ઐં અપરાજિતાયૈ નમઃ । ઐં રુદ્રાણ્યૈ નમઃ । ઐં ભૈરવ્યૈ નમઃ ।
ઐં મહાલક્ષ્મ્યૈ નમઃ । ઐં પીઠનાયિકાયૈ નમઃ ।
ઐં ક્ષેત્રજ્ઞાયૈ નમઃ । ઐં ચર્ચ્ચિકાયૈ નમઃ ॥

સુવાસિનીભ્યઃ— યા દેવી સર્વભૂતેષુ શક્તિરૂપેણ૦૦ ॥

પુરન્ધ્રી-સ્ત્રીણાં પૂજનમ્ -
ગન્ધાક્ષતોપહારૈઃ સન્તોષ્ય ॥

પ્રણમેત્ – યા દેવી સર્વભૂતેષુ માતૃરૂપેણ૦૦॥

(વિશેષ - સુવાસિની વ પુરન્ધ્રી-સ્ત્રી સગોત્રીયા ૭ પિઢ઼ીતક કી અથવા
સોદકા ૮ સે ૧૪ પિઢ઼ી તક કી હી પૂજનીયા હૈં તદન્ય કેવલ વન્દનીયા –
બાલાં વા યૌવનોન્મત્તાં વૃદ્ધાં વા સુન્દરીં તથા ।
કુત્સિતાં વા મહાદુષ્ટાં નમસ્કૃત્ય વિભાવયેત્ ॥

તાસાં પ્રહારં ન નિન્દાં ચ કૌટિલ્યમપ્રિયં યથા ।
સર્વથા ચ ન કર્તવ્યમન્થા શક્તિરોધકૃત્ ॥

યદિ ભાગ્યવશાદ્દેવી કુલદૃષ્ટિઃ પ્રજાયતે ।
તદેવમાનસીં પૂજા તત્ર તાસાં પ્રકલ્પયેત્ ॥

યદિ સ્ત્રી કે ગોપનીયાઙ્ગ દિખ જાએ તો દેવીદૃષ્ટિ
સે માનસિક નમસ્કાર કરે । વિકાર સે દૂર રહે ।

સઙ્કલ્પઃ–
અનેન બટુકકુમારીસુવાસિનીનાં પૂજનેન તત્ સત્ શ્રી જગદમ્બાર્પણમસ્તુ ॥

॥ કુમારીપૂજન ફલાદેશઃ ॥

પૂજોપકરણાનીહ કુમાર્યૈ યો દદાતિ હિ ।
સન્તુષ્ટા દેવતા તસ્ય પુત્રત્વે સોઽનુકલ્પ્યતે ॥

॥ યોગિની તન્ત્રે ॥

કુમારીપૂજનફલં વક્તું નાર્હામિ સુન્દરિ ।
જિહ્વાકોટિસહસ્રૈસ્તુ વક્ત્રકોટિશતૈરપિ ॥

કુમારી પૂજ્યતે યત્ર સ દેશઃ ક્ષિતિપાવનઃ ।
મહાપુણ્યતમો ભૂયાત્ સમન્તાત્ ક્રોશપઞ્ચકમ્ ॥

॥ રુદ્રયામલે ॥

મહાપૂજાદિકં કૃત્વા વસ્ત્રાલઙ્કારભોજનૈઃ ।
પૂજનાન્મન્દસૌભાગ્યોઽપિ લભતે જયમઙ્ગલમ્ ॥

પૂજયા લભતે પુત્રાન્ પૂજયા લભતે શ્રિયમ્ ।

પૂજયા ધનમાપ્નોતિ પૂજયા લભતે મહીમ્ ॥

પૂજયા લભતે લક્ષ્મીં સરસ્વતીં મહૌજસમ્ ।
મહાવિદ્યાઃ પ્રસીદન્તિ સર્વે દેવા ન સંશયઃ ॥

કાલભૈરવબ્રહ્મેન્દ્ર બ્રાહ્મણા બ્રહ્મવેદિનઃ ।
રુદ્રશ્ચ દેવવર્ગાશ્ચ વૈષ્ણવા બ્રહ્મરૂપિણઃ ॥

અવતારાશ્ચ દ્વિભૂજા વૈષ્ણવા મનુશોભિતાઃ ।
અન્યે દિક્પાલદેવાશ્ચ ચરાચરગુરુસ્તથા ॥

નાનાવિદ્યાશ્રિતાઃ સર્વે દાનવાઃ કૂટશાલિનઃ ।
ઉપસર્ગસ્થિતા યે યે તે તે તુષ્ટા ન સંશયઃ ॥

કુમારી યોગિની સાક્ષાત્ કુમારી પરદેવતા ।
અસુરા દુષ્ટનાગાશ્ચ યે યે દુષ્ટગ્રહા અપિ ॥

ભૂતવૈતાલગન્ધર્વા ડાકિનીયક્ષરાક્ષસાઃ ।
યાશ્ચાન્યા દેવતાઃ સર્વા ભૂર્ભુવઃ સ્વશ્ચ ભૈરવાઃ ॥

પૃથિવ્યાદીનિ સર્વાણિ બ્રહ્માણ્ડે સચરાચરમ્ ।
બ્રહ્મા વિષ્ણુશ્ચ રુદ્રશ્ચ ઈશ્વરશ્ચ સદાશિવઃ ॥

સન્તુષ્ટાઃ સર્વતુષ્ટાશ્ચ યસ્તુ કન્યાં પ્રપૂજયેત્ ।
અદ્યાહં શુદ્ધરૂપા હિ અન્યલોકે ચ કા કથા ॥

કુમારીપૂજનં કૃત્વા ત્રૈલોક્યં વશમાનયેત્ ।
મહાકાન્તિર્ભવેત્ક્ષિપ્રં સર્વપુણ્યફલપ્રદમ્ ॥

॥ નીલતન્ત્ર ॥

મહાભયાર્તિ દુર્ભિક્ષાદ્યુત્પાતાનિ કુલેશ્વરિ ।
દુઃસ્વપ્નમપમૃત્યુશ્ચ યે ચાન્યે ચ સમુદ્ભવાઃ ॥

કુમારીપૂજનાદેવ ન તે ચ પ્રભવન્તિ હિ ।
નિત્યં ક્રમેણ દેવેશિ પૂજયેદ્વિધિપૂર્વકમ્ ॥

ઘ્નન્તિ વિઘ્નાન્પૂજિતાશ્ચ ભયં શત્રૂન્મહોત્કટાન્ ।
ગ્રહા રોગાઃ ક્ષયં યાન્તિ ભૂતવેતાલપન્નગાઃ ॥

તાવજ્જિત્વા પૂજયિત્વા કન્યાં સુન્દરમોહિનીમ્ ।

દિવ્યભાવસ્થિતં સાક્ષાત્તન્ત્રમન્ત્રફલં લભેત્ ॥

મહાવિદ્યા મહામન્ત્રઃ સિદ્ધિમન્ત્રો ન સંશયઃ ।
વિધિયુક્તાં કુમારીં તુ ભોજયેચ્ચૈવ ભૈરવ ॥

પાદ્યાર્ઘ્યં ચ તથા ધૂપં કુઙ્કુમં ચન્દનં શુભમ્ ।
ભક્તિભાવેન સમ્પૂજ્ય કુમારીભ્યો નિવેદયેત્ ॥

॥ કુબ્જિકા તન્ત્રે ॥

અન્ન વસ્ત્રં તથા નીરં કુમાર્યૈ યો દદાતિ હિ ।
અન્નં મેરુસમં દેવ જલં ચ સાગરોપમમ્ ॥

વસ્ત્રૈઃ કોટિસહસ્રાબ્દં શિવલોકે મહીયતે ।
પૂજોપકરણાનીહ કુમાર્યૈ યો દદાતિ હિ ।
સન્તુષ્ટા દેવતા તસ્ય પુત્રત્વે સાનુકલ્પતે ॥

॥ યામલે ॥

બાલપ્રિયં ચ નૈવેદ્યં દત્ત્વા તદ્ભાવભાવિતઃ ।
મૃદા તદ્ઙ્ગમાત્માનં બાલભાવવિતેષ્ટિતમ્ ॥

અતિપ્રિયકથાલાપક્રીડા કૌતૂહલાન્વિતઃ ।
યથાર્થં તત્પ્રિયં તન્ત્રં કૃત્વા સિદ્ધીશ્વરો ભવેત્ ॥

કુસુમાઞ્જલિપૂર્ણં ચ કન્યાયૈ કુલપણ્ડિતઃ ।
દદાતિ યદિ તત્પુષ્પં કોટિમેરુહિણ્યવત્ ॥

તદ્દાનજં મહાપુણ્યં ક્ષણાદેવ સમાલભેત્ ।
કુમારી ભોજિતા યેન ત્રૈલોક્યં તેન ભોજિતમ્ ॥

કુમારીપૂજનં કુર્યાત્સર્વકર્મફલાપ્તયે ।
સદાભોજનવાઞ્છાઢ્યા માન્યા સન્તુષ્ટહાસિની ।
વૃથા ન રૌતિ સા દેવી કુમારી દેવનાયિકા ॥

॥ કુમારી કવચે ॥

સામ્રાજ્યં પ્રદદાતિ યા ભગવતી વિદ્યા મહાલક્ષણા
    સાક્ષાદષ્ટસમૃદ્ધિદા ભુવિ મહાલક્ષ્મીઃ કુલક્ષોભહા ।
સ્વાધિષ્ઠાનસુપઙ્કજે વિલસિતાં વિષ્ણોરનન્તશ્રિયં
    વન્દે રાજપ્રદાં શુભકરીં કૌલેશ્વરીં સર્વદા ॥

Encoded and proofread by Gopal Upadhyay gopal.j.upadhyay at gmail.com
Advisory: Shastri Pulakit H. Vyasa

---

*kumArI pUjA*

pdf was typeset on October 4, 2019

Please send corrections to *sanskrit@cheerful.com*